**Shikshan Sanshodhan : Journal of Arts, Humanities and Social Sciences** ISSN: 2581-6241 Volume - 4, Issue - 1, Jan – 2021
Monthly, Peer-Reviewed, Refereed, Indexed Journal Impact Factor: 3.589
Received on : 10/01/2021 Accepted on : 23/01/2021 Publication Date: 31/01/2021

# संस्कृतशिक्षणे नूतनविधीनामावश्यकता

**1 प्रसेनजित घोषालः, 2 श्यामल कुमार मण्डलः,**

1 शोधछात्रः, संस्कृत-पालि-प्राकृत विभाग, विश्वभारती, शान्तिनिकेतन

Email – prasenjitghoshal1987@gmail.com

2 शिक्षाचार्य छात्रः, राष्ट्रिय संस्कृत विश्वविद्यालयः, तिरुपतिः

Email - mondalshyamal170@gmail.com

**सारांशः** 'अनन्ता वै वेदाः' इत्युक्त्यनुसारं शिक्षाक्षेत्रमप्यनन्तं विस्तृतञ्च वर्तते। लोकोऽयं परिवर्तनशीलः। अतः शिक्षाक्षेत्रेऽपि अधुना दृश्यमानपरिवर्तनेन सह संस्कृतभाषाशिक्षणव्यवस्थापि परिवर्तनीया। तत्र संस्कृतशिक्षणे संस्कृतभाषा - व्याकरण - साहित्य - काव्य - गद्य - पद्य - नाटकादि बहुविधशिक्षणानि सन्ति। छात्राः संस्कृतभाषाध्ययने अतीवक्लेशमनुभवन्ति, वस्तुतः संस्कृतव्याकरणपाठनार्थं केचन व्याकरणशिक्षणविधयः शिक्षणोपकरणानि च आवश्यकानि। तैः उपकरणैः शिक्षणविधिभिश्च प्राचीनविधीनामपेक्षया आधुनिकविधीनां प्रयोगेण संस्कृतभाषाध्यापनं समीचीनं भवति। अधुना संस्कृतभाषायाः पाठनं ऐच्छिकरुपेण अथवा द्वितीयभाषा, तृतीयभाषारुपेण भवति। अध्यापकाः संस्कृतभाषा शिक्षणार्थं व्याख्यानादिः पुरातन विधयः एव सर्वदा समाश्रयन्ति इत्यतः संस्कृतभाषाशिक्षणं नीरसयुक्तमेव भवितुमर्हति। तेन छात्राः संस्कृतभाषापठनेऽपि अनिच्छुकाः भविष्यन्ति। तस्य निवारणं नूतनविध्याश्रयणेनैव सम्भवितुमर्हति। छात्राणां मनोरञ्जकपूर्वकं विषयस्य ग्रहणं नूतनविध्याश्रयणेनैव शीघ्रतया सम्भवति। अत :छात्रकेन्द्रितनूतनविधीनां चयनमपेक्ष्यते।

## १. प्रस्तावनाः

भाष् व्यक्तायां वाचि इत्यस्माद्धातोः (भ्वादिगणः-आत्म-द्विक-सेट्) **गुरोश्च हलः** इति 'अ' प्रत्यये ततः स्त्रियां टापि भाषेति शब्दो निष्पद्यते। मानवानां सर्वेऽपि व्यवहाराः भाषयैव सम्पाद्यन्ते। बह्व्यः भाषाः लोके विद्यन्ते। तासु सरला मुख्या मधुरा गीर्वाणभारती वाक्सरस्वती इत्यादिभिः विख्याता संस्कृतभाषा या हि संस्कृतिसंरक्षिका वर्तते। संस्कृतमितिपदं सम्पूर्वकात् डुकृञ् धातोः क्तप्रत्यये सति **"सम्परिभ्यां करोतौ भूषणे"** इति भूषणेऽर्थे सुडागमः ततः संस्कृतमिति सिद्धम्। यस्यार्थो भवति परिष्कृतं परिशुद्धं व्याकरणादिदोषरहितं यत् तत् संस्कृतम्। सेयं भाषा अनादिकालादहनोति । यथोक्तम् -

**अनादिनिधना ह्येषा वागुत्सृष्टा स्वयम्भुवा ।**
**आदौ वेदमयी दिव्या यतस्सर्वा प्रवृत्तयः।।**[1]

भारतीयसंस्कृतौ भाषेयं देवभाषात्वेन व्यवह्लियते। प्राचीनानाम् ऋषीणां महर्षीणां कवीनां तत्त्वज्ञानामनवरतपरिश्रमस्यैव फलमेतद् यदीदृशं विपुलं संस्कृतवाङ्मयमस्मद्दृष्टिमुपयाति। संस्कृतेनैव वस्तुतः भारतीयसंस्कृतेः वास्तविकं स्वरूपं प्रतिभाति प्रकाशते च। संस्कृतं खलु भारतस्य भारती। तथ्यमिदमुदघोषि अमरसिंहेन-

**ब्राह्मी तु भारती भाषा गीर्वाग्वाणी सरस्वती।**
**व्याहार उक्तिर्लपितं भाषितं वचनं वचः।।**[2] इति

विधीयते अनेन इति विधिरिति व्युत्पत्त्या धाञ् धातोः उपसर्गे घोः कि रिति 'कि' प्रत्यये कृते शब्दोऽयं निष्पद्यते। शिक्षाक्षेत्रे सारल्येनावबोधनाय अभिरुचेः संवर्धनाय च शिक्षाविद्भिः स्वबुद्धिशक्त्यायोजनाः पर्यकल्पिषत। यतोहि योजनानुसारमध्यापनं भवति चेत् शिक्षकाः सुन्दरं सामञ्जस्यपूर्णं विषयस्य उपस्थापनं कर्तुं शक्नुवन्ति। छात्रा अपि सुष्ठु अवगच्छन्ति। इयं योजना विधिः,रीतिः, प्रणाली, पद्धतिर्वा प्रोच्यते।

संस्कृतभाषाशिक्षणे शिक्षाविद् Jhon Mander महोदयेन शिक्षणविधीनां प्रयोगः विहितः। तान् विधीन् मुख्यतया त्रिधा विभाजयितुं शक्नुमः। यथा –

Shikshan Sanshodhan : Journal of Arts, Humanities and Social Sciences ISSN: 2581-6241 Volume - 4, Issue - 1, Jan – 2021
Monthly, Peer-Reviewed, Refereed, Indexed Journal Impact Factor: 3.589
Received on : 10/01/2021 Accepted on : 23/01/2021 Publication Date: 31/01/2021

1.पद्यशिक्षणविधयः

2.गद्यशिक्षणविधयः

3.व्याकरणशिक्षणविधयः

एतेषु विधिषु व्याकरणविषयान् पाठयितुं व्याकरणशिक्षणविधयः महदुपकुर्वन्ति।

भाषायाः अध्ययने व्याकरणशिक्षणं रोचकम् आकर्षकं सुग्राह्यञ्च कर्तुं विभिन्नविधीनां प्रयोगाः प्राचीनकालादेव क्रियते स्म। अतः व्याकरणाध्ययनं विना संस्कृतस्य निकृष्टं ज्ञानाभिवर्धयितुं न शक्यते। अतः शिक्षाविद्भिः परिकल्पिताः प्रतिपादिताश्चैते विधयो व्याकरणाध्यापनायोपकुर्वन्ति।

## २. शोधपरिधिः

- **नूतनविधयः**

आधुनिकव्याकरणशिक्षणविधिष्वेते प्राधान्येनव्यवह्रियन्ते १.प्रत्यक्षविधिः २.ह्युरिष्टिक् विधिः ३.भण्डारकरविधिः ४.अनौपचारिकविधिः ५.अभ्यासविधिः ६.परियोजनाविधिः ७.निदर्शनविधिः ८.आगमनविधिः ९.निगमनविधिः १०. अभिक्रमिताधिगमविधिः।

एतेषु विधिषु प्रकृतानुसन्धाने केषाञ्चन आधुनिकविधीनां परिचयः प्रस्तूयते।

**प्रत्यक्षविधिः**

अयं नूतनविधिः आङ्गलानां भारतागमनानन्तरं समभूत्। आङ्गलजनाः आङ्गलं विना संस्कृतम् एवमेव इतरा भाषा न जानन्ति स्म। अतः ते आङ्गलम् आङ्गलभाषया अध्यापयितुं प्रायतन्त। क्रमेण भारतेऽपि प्रत्यक्षविधेः प्रभावः अजायत। सा भाषा तया भाषयैव अध्याप्येत इति प्रत्यक्षविधिर्भवति। एषा पद्धतिः प्रायशः बहुत्र आङ्गलशालासु प्राचुर्यं दृश्यते।

**ह्यूरिष्टिक् विधिः**

ह्यूरिष्टिक् इति पदं ह्युरिष्को (Heurisco) इति ग्रीक्शब्दात् निष्पन्नं भवति। अस्यार्थः **'अहमन्विष्यावगच्छामि'** इति। अस्मिन् विधौ छात्राः स्वयमेव तत्त्वमन्विष्यावगच्छन्ति। शिक्षकः तदर्थं व्यवस्थापयति। स तु केवलं मार्गदर्शकरूपेण कार्यं करोति, न तु सर्वं विषयं पाठयति छात्रेभ्यः। तत्त्वानि अवलोकयितुं निरीक्षितुं च अवसरः कल्पयति। छात्राः विविधोपकरणानां साहाय्येन तत्त्वान्यवलोक्य नियमं मूल्यभूतं तत्त्वं वा अवगच्छन्ति। एतं प्रथमतया Prof. H.E. Armstrong महोदयः उपाजानात्। विधावस्मिन् पञ्चसोपानानि सन्ति-

१.समस्यायाः प्रस्तावः, २.तत्त्वानां निरीक्षणं, सारणीकरणञ्च, ३.परिकल्पना, ४.परीक्षणम्, ५. नियमनिर्धारणम्।

**भाण्डारकरविधिः**

आङ्गेलेयानां भारते आगमनेन अस्माकं शिक्षाव्यवस्था क्षयमवाप। तेन शिक्षाक्षेत्रे महत् परिवर्तनं जातम्। आगतेषु पाश्चात्त्येषु कानिचन प्राच्यभाषासु अभिरुचिं प्रादर्शयन्। अतः एतान् संस्कृतभाषां शिक्षयितुं काचिदनुवादपद्धतिराश्रिता। अनया पद्धत्या व्याकरणं सरलीकृत्य भावान्तरेणाभ्यासद्वारा शिक्षणं प्रादीयत। अमुमेवमार्गमवलम्ब्य डा. सर. रामकृष्णगोपाल भण्डारकर महोदयेन पाश्चात्यक्रममनुसृत्य व्याकरणानुवादविधिमाश्रित्य पुस्तकद्वयं प्रणीतम्। तत्र **मार्गोपदेशिका** इत्यस्मिन् पुस्तके ३१ पाठाः सन्ति। **संस्कृतमन्दिरान्तः प्रवेशिका** इति पुस्तके २६ पाठाः सन्ति।

**अनौपचारिकविधिः**

विधावस्मिन् औपचारिकरीत्या नैव पाठ्यते। परं शुद्धोच्चारणं साधुशब्दज्ञानं विभक्तिलिङ्गपुरुषवचनानां व्यवहारोपायाश्च भाषाद्वारा अध्यायन्ते। अस्यां पद्धतौ सरलात्
कठिनं प्रति इति शिक्षणसूत्रं प्रयुज्यते।

**अभ्यासविधिः**

इयं प्रणाली अनौपचारिकविधिरपेक्षया सुविस्तृता भवति। व्याकरणनियमानां भाषायाम् अभ्यासद्वारा व्याकरणशिक्षणं सम्पाद्यते। वर्तमानपाठ्यपुस्तकेषु इयं पद्धतिः अवलोक्यते। अनेन व्याकरणशिक्षणे सारल्यमनुभूयते।

**परियोजनाविधिः**

Jhon Dewey महोदयस्य शिष्यः W.H. Kilpatric महोदयः अस्य विधेः प्रवर्तकः। सामाजिक परिवेशे संलग्नतापूर्वकं क्रियमाणा सोद्देश्या प्रक्रिया परियोजना। स्टीवेन्सन् महोदयेन एवमुक्तम् – **"प्राकृतिकवातावरणे समस्यात्मकप्रक्रियायाः समाधानान्वेषणमेव परियोजना भवति। एवञ्च परियोजनाविधिना व्याकरणपाठं सुष्ठु सम्पाद्यते।"**

**Shikshan Sanshodhan : Journal of Arts, Humanities and Social Sciences** ISSN: 2581-6241 Volume - 4, Issue - 1, Jan – 2021
Monthly, Peer-Reviewed, Refereed, Indexed Journal Impact Factor: 3.589
Received on : 10/01/2021 Accepted on : 23/01/2021 Publication Date: 31/01/2021

**आगमनविधिः**

आदौ उदाहरणमुक्त्वा तदनन्तरं नियमनिर्धारणम् अथवा लक्ष्यं प्रदर्श्य लक्षणपरिकल्पनं नाम आगमनविधिः भवति। विधिरयमाङ्गलभाषया Inductive Method नाम्ना अभिधीयते। पदस्यास्य मूलपदं वर्तते 'Induce' यस्यार्थो भवति ऊहाकरणम्। केषाञ्चन समानांशानां विश्लेषणं कृत्वा याः कल्पनाः कल्प्यन्ते तासां कल्पनाधारेण नियमीकरणं भवति आगमनम्। नाम उदाहरणानि परिशील्य तत्तदुदाहरणेषु अवलोकितसाम्यताधारेण किमपि नियमनिर्धारणमेव आगमनविधित्वेन व्यवह्रियते। इत्थम् उदाहरणानि प्रदर्श्य तत्र तत्सम्बद्धसूत्रस्यागमनमेव आगमनविधिः भवति। लोके लक्ष्यमेव प्रथमगण्यम्। यतः व्यवहारमवलोक्यैव तस्य नियमनं क्रियते। यथा भाषायाः प्रवाहः मौलिकः। तस्याः नियमनमनन्तरं व्याकरणद्वारा क्रियते। भर्तृहरिणा अप्युक्तम् – **'असत्ये वर्त्मनि स्थित्वा ततः सत्यं समीहते'** इति। एतेन लक्ष्यं प्रथमं लक्षणं तदनुयायि इति फलति। महाभाष्येऽपि लक्ष्यलक्षणे व्याकरणमित्युक्तम्। वस्तुतः प्राचीनकालादारभ्य आगमनविधिः शास्त्रसंरचने वर्तते। यथा पाणिनिना व्याकरणशास्त्रमागमनविधिना प्रणीतम्।

**जोसेफलेण्डन**महोदयेनैवं पर्यभाषि यत् – **"यदि छात्राणां पुरतः बहूनि उदाहरणानि, तत्त्वानि वस्तूनि वा प्रस्तुयन्ते, ततः परं नियमाश्च निश्चीयन्ते, तर्हि तत्र आगमनविधिरनुसर्यत इत्यर्थः।**

"We make use of the inductive method of teaching whom ever, we place before children a number of examples or objects then end devour to lead them to draw their own conclusions."

छात्राणामर्थरहिते सूत्ररटणेऽभिलाषा न वर्तते। परन्तु ते स्वयं किमपि कर्तुमिष्टमाणाः भवन्ति। अतः विधावस्मिन् नियमा आदावेव नोच्यन्ते। परन्तु तत्सम्बद्धानि उदाहरणानि लिख्यन्ते। सर्वेषूदाहरणेषु सन्निरीक्षणं वर्गीकृत्य कश्चन समानांशः कल्प्यते। तदाधारीकृत्य नियमाः निर्धार्यन्ते। ततः कल्पितं नियमं पुनः उदाहरणेषूपयुज्य शिक्षकस्य सहयोगेन छात्राः विषयमवगच्छन्ति। सर्वेयं प्रक्रिया आगमनविधिरित्युच्यते। अयं मनोवैज्ञानिकविधिर्भवति।

- **संस्कृतशिक्षणे नूतनविधीनामावश्यकता**

महर्षिपतञ्जलिना महाभाष्ये उक्तम् - 'व्यक्ता वाक् वर्णनात् इमा व्यक्तावाचः'। **इयं** भाषाशिक्षणे व्याकरणपाठनस्यापेक्षाविषये चर्चा बहुकालादारभ्य प्रचलति। विंशतिशताब्दे प्रारम्भकाले एतस्य अधिकप्राधान्यमागतम्। तेन भाषापठनस्य अन्यांशानाम् अप्राधान्यतं च समागतम्। व्याकरणाध्ययनाय न केवलं शास्त्रज्ञानमेवापेक्ष्यते अपि तु प्रायोगिक ज्ञानमपेक्ष्यते। अतः अनन्तरकाले पुनः व्याकरणं भाषाशिक्षणे अप्राधान्यविषयेषु अन्तर्जातम्। किन्तु व्याकरणं विना भाषापठनं सम्पूर्णं न भवत्यतः भावनया नुतनव्याकरणशिक्षण - भाषा शिक्षणपद्धतीनां स्वीकरोऽभवत्। एवं सैद्धान्तिकव्याकरणस्य (Formal Grammar) शिक्षणम् इत्युक्ते केवलसिद्धान्तानां शिक्षणं करणीयं वा उत कार्यात्मकव्याकरणस्य (Functional Grammar) नाम प्रयोगोपयोगिनः व्याकरणस्य शिक्षणमपेक्ष्यते वा इति विषये विद्वत्सु मतभेदो दृश्यते। छात्राणां कृते मनोवैज्ञानिकदृष्ट्या एवम् अभिरुचिसंवर्धनार्थं च कार्यात्मकव्याकरणस्योपयोगः युज्यः इति डा. आर. पी. पाठक महोदयः अभिप्रेति। पाठनीयव्याकरणांशाः छात्रेच्छानुगुणाः, भाषापठने अभिरुचिसंवर्धकाः पाठ्यसामग्रीसम्बन्धिनः च भवेयुः, एवं तस्य शिक्षणम् उचितपाठ्यपद्धत्या च भवेत् ।

सस्कृतशिक्षणस्य व्यवस्था ईषद्धीना। भारते संस्कृतस्य स्थानं क्वचित् द्वितीयभाषारूपण, तृतीयभाषारूपेण एवञ्च ऐच्छिकभाषारूपेण वा वर्तते।अतः संस्कृतशिक्षणे तत्रापि संस्कृतव्याकरणशिक्षणे पाठनीयविषयानां, पद्धतीनाम, उपकरणानां, परिस्थितीनां च विपये अत्यन्तश्रद्धा दातव्या। व्याकरणशिक्षणं कथं भवेदिति विपये Lynn Cameron अभिप्रेति यत् - " Grammar can be taught without technical label " इति। एवं संस्कृतव्याकरण शिक्षणमपि लाक्षणिकरीत्या न भवेत्। व्याकरणशिक्षणं भाषाशिक्षणस्थापरिहारोऽङ्गः। शुष्कभाषानियमानां भाण्डागारः भवति व्याकरणमित्यतः व्याकरणस्य स्थानं नीरसविषये अन्तर्भवति। व्याकरणशिक्षण व्यवस्थाविषये Lynn Cameron वदति - **एवरस्ट् पर्वतारोहणं किमर्थं कृतमिति प्रश्ने सति तदस्तीत्यतः इति कैश्चिदुक्तम्। तद्वत् व्याकरणमपि भीमाकारपर्वतमस्तीत्यतः तत्पाठयति इति रीत्या न भवेत् व्याकरणपाठनरीतिः** इति। अतः कस्यामपि भाषायां वा व्याकरणशिक्षणावसरे अत्यधिकश्रद्धा दातव्या, तत्रापि संस्कृतव्याकरणशिक्षणावसरे। भाषापठनसन्दर्भे उच्चप्राथमिकस्तरीयछात्राणां कृते व्याकरणशिक्षणम् अध्यापकेभ्यः एवं छात्रेभ्यश्च क्लेशपूर्णो विषयः। यदि अध्यापकः उच्चप्राथमिकस्तरे एव छात्राणां मनसि संस्कृतव्याकरणपठने इच्छां, पठने अनायांसतां, सरलता, रुचिं, प्रेरणां च उत्पादयति तर्हि अनन्तरकाले क्लिष्टविषयाणां पठनेऽपि ते इच्छां, प्रयासश्च अवश्यं प्रदर्शयेयुः। अतः उच्चप्राथमिकस्तरीयछात्राणां संस्कृतव्याकरणाध्यापनाय अत्यन्ताधुनिकानां, क्रियाशीलयुक्तानाम्,

अभिप्रेरणापूर्णानां च विधीनां प्रयोगः कार्यः। नीरसयुक्तप्राचीननिष्क्रियात्मकविधीनां प्रयोगेण छात्राः निष्क्रियाः एवम् अङ्कप्राप्तये कण्ठस्थीकरणादिनीरसक्रियाद्वारा न केवलं व्याकरणपठने अपि तु संस्कृत पठनेऽपि अनिच्छुकाः भवेयुः। तन्निवारणार्थमेवं नूतनानाम् अत्यन्ताधुनिकानां विधीनां स्वीकारः अनिवार्यः। अधुनासम्पूर्णशिक्षाक्षेत्रे Active Based Teaching Methods नामसक्रियात्मक शिक्षणविधीन् एव शिक्षणार्थं सर्वेऽपि निर्दिशन्ति। संस्कृतशिक्षणेऽपि सङ्गणकसहकृतपद्धतीनां, क्रीडाविध्यादि नूतनविधीनां प्रयोगः करणीयः।

**३. निष्कर्षः**

संस्कृतभाषाशिक्षणसन्दर्भे पाठ्यविषयानुगुणं शिक्षकाः यथोचित आधुनिकविधिचयनं कुर्युः। छात्राणां स्तरानुगुणं स्वीकृतविधिः व्याकरणपठनप्रेरणाजनकश्च भवेत्। संस्कृताध्यापकेभ्यः आधुनिकविधीनां प्रयोगार्थं विशेषप्रशिक्षणव्यवस्था कल्पनीया। संस्कृतभाषाशिक्षणे नूतनविधीनामुपयोगाय शिक्षकाः तत्पराः भवेयुः। संस्कृतव्याकरणादि क्लिष्टपूर्णविषयेषु शिक्षणसन्दर्भे शिक्षकाः सक्रियात्मकविधीनां चयनं कुर्युः। एतेषामुपयोगेन जटिलस्यापि संस्कृतविषयस्य सारल्येनावगमनं भवेत् व्याकरणाध्ययनाभिरुचिश्च संवर्धेत्।

**तथ्यसूत्रम् –**

(1) म. भा. शान्ति २३२/५६

(2) अ .को.१/६/१

**सन्दर्भग्रन्थसूचीः**

१. झा, डा. उदय शंकर (2011), **संस्कृतशिक्षणम्,** चौखम्बा सुरभारती प्रकाशनम्, वाराणसी, उत्तरप्रदेशः।
२. पात्रः, डा. वृन्दावन (2013), **शिक्षणस्य वैज्ञानिकाधारः,** दिव्यप्रकाशनी, भुवनेश्वरम्।
३. देवी, के. श्रीलक्ष्मी (1996), **संस्कृतशिक्षणम्,** श्रीवानी प्रिन्टार्स, तिरुपतिः।
४. कम्भम्पाटि, साम्बशिवमूर्तिः (2006), **संस्कृतशिक्षणम्,** दीपशिखा प्रकाशनम्, जयपुरम्।
५. मित्तलः, श्रीमती सन्तोष (2006), **संस्कृतशिक्षणम्,** नवचेतना पाब्लिकेशन्स, जयपुरम्।
६. मिश्र, आचार्य रामचन्द्र (2007), **संस्कृतसाहित्येतिहासः,** चौखम्बा विद्याभवनम्, वाराणसी, उत्तरप्रदेशः।
७. रावः डा. पि. वेङ्कट (2007), **शिक्षासांख्यिकी,** राष्ट्रियसंस्कृतविद्यापीठम्, तिरुपतिः, आन्ध्रप्रदेशः।
८. शर्मा, च.ल.ना, सिंह, फतेह (2008), **संस्कृतशिक्षणम् - नवीनप्रविधयश्च,** आदित्यप्रकाशनम्, जयपुरम्।

**संकेतविवरणी**

प.म. - पतञ्जलिमहाभाष्यम् ।
स.श. - संस्कृतशिक्षणम् ।
अ.को – अमरकोषः।
म.भा. – महाभारतम् ।